# भूमाद्यर्थानुशीलनम्

**डॉ. अशोक कुमार झा**
व्याख्याता–व्याकरण
राजकीय धूलेश्वर आचार्य संस्कृत महाविद्यालय
मनोहरपुर (जयपुर)

यद्यपि व्यापकदृष्ट्या समीक्षणेन अस्य अस्मिन्निति गम्यम् अधिकरणसम्बन्ध–रूपमर्थमुन्नयन्ति मतुबर्थप्रत्ययाः, तथा प्रत्यययोगात् अर्थोपलब्धेः। तथापि, सूत्रकारेणैव एतदर्थद्वयातिरिक्ता अपि संज्ञायाम् कामवति, बलवति, उदधौ सौराज्ये, देशे, उन्नते, आहतप्रशंसयोः, जातौ ब्रह्मचारिणि चैतेषु अर्थेषु अपि प्रत्यययोगात् लभ्या भावाः प्रोक्ताः। वार्तिककारेण च कल्याणे, अङ्गविवृद्धौ, असहने, समूहे, असन्निहिते। एतदतिरिच्यापि भाष्यकारेण भूमादयः षडर्थाः स्ववार्तिकरूपेण इति पदसामर्थ्येन कथिताः। यद्यपि एते भूमादयः प्रत्ययार्थ इति न शक्यते वक्तुं तावता तादृशार्थाप्रतीतेः। अतः प्रकृतिप्रत्ययसमुदितस्यैव एतेऽर्थास्तत्र तत्र यथास्थलं बोध्यन्ते।

यद्यपि प्रकृतिप्रत्ययविभागस्य असत्यत्वं बहुधा ग्रन्थेषु लभ्यते, तदनुगुणं प्रत्ययानामपि काल्पनिकमेव अर्थवत्वं सिध्यति। अत उक्तं कैयटेन लोके यदा पाक इति शब्दः प्रयुज्यते तदानीं प्रकृतिप्रत्यययोर्विचारं कृत्वा न कश्चितं प्रयुङ्क्ते। पारमार्थिकोऽर्थस्तु वाक्यस्य न तु तदन्तर्गतानां शब्दानाम्। अत इदं सर्वमान्यं यत् पदान्तर्गतानां प्रतययादीनां कश्चिद् वास्तविकोऽर्थो नास्त्येव, केवलेन तत्प्रयोगेण लोके न कश्चिदर्थो बोध्यते।

यद्यपि प्रकृतिप्रत्ययविभागस्य असत्यत्वं बहुधा ग्रन्थेषु लभ्यते, तदनुगुणं प्रत्ययानामपि काल्पनिकमेव अर्थवत्वं सिध्यति। अत उक्तं कैयटेन लोके यदा पाक इति शब्दः प्रयुज्यते तदानीं प्रकृतिप्रत्यययोर्विचारं कृत्वा न कश्चितं प्रयुङ्क्ते। पारमार्थिकोऽर्थस्तु वाक्यस्य न तु तदन्तर्गतानां शब्दानाम्। अत इद सर्वमान्यं यत् पदान्तर्गतानां प्रत्ययादीनां कश्चिद् वास्तविकोऽर्थो नास्त्येव, केवलेन तत्प्रयोगेण लोके न कश्चिदर्थो बोध्यते।

अत्रापि विवक्षानुसारं प्रयोगानां साक्षाद्ज्ञापनार्थम् इति प्रयोगः सूत्रकारेण अतिप्रियत्वेन विहितो वर्तते। तदस्यास्त्यस्मिन्नितिगतेन इति पदेन ज्ञाप्यते यत् केवलं साधारणमस्तित्वं बोधयितुं न मतुप्प्रत्ययः, प्रत्युत भूमादिषु गम्यमानेषु एव मतुब् विधियते। भगवता सूत्रकारेण इति शब्दबलेन अत्र अस्तित्वस्यैवं नियमनं कृतम्। यद्यपीदं साक्षादर्थनियमनं नाऽस्ति अपि तु विवक्षानियमनं तथापि विवक्षापि अर्थविशेष एव, अतः सम्बद्धानि उदाहरणानि उपन्यस्यन्ते।

यद्यपि प्रशंसादयो मनोभावाः सर्वत्र शब्दादेव न ध्वन्यन्ते, एते कदाचित् प्रकरणगम्या अन्येन प्रमाणेन वा विज्ञेया भवन्ति अतः क्वचित्–क्वचित् शब्दतोऽनुक्त्वा शूत्रनिष्पन्नशब्दस्यर्थः प्रयोगेषु प्रशंसाविशिष्ट इति भवति–

सूत्रकारेण कण्ठतस्तदस्यास्ति तदस्मिन्नस्तीत्यनयोरेवार्थयोर्मतुप् इत्युक्तं[1] किन्तु विद्यमानतया सहैव भूमादयोऽपि भावा यदि अनुस्यूताः प्रतीयन्ते तदैव प्रत्यया विधीयन्ते। एते अनुस्यूता भावाः सर्वथा लौकिकविवक्षाधीना भवन्ति अतः प्रकृतसूत्रे ते शब्दतो नोक्ताः। एतावन्मात्रेण एतन्नैव ज्ञेयम् यदेते अर्थाः पाणिनिसम्मता नेति। अर्थनिर्देशे प्रायः सूत्रकारो मौनमेवावलम्बते। अतस्तदनुक्तिमात्रेण शब्दार्थसम्बन्धी निर्णयः कोऽपि सहसा न विधातव्यः। अर्थसम्बन्धी निर्णयोऽपि व्याकरणस्य मुख्यः प्रतिपाद्यो नाऽस्ति न वात्र विषये तस्य कश्चिद् द्रढ़ीयान् आग्रह एव लक्ष्यते। यथार्थमुक्तं भर्तृहरिणा–

**तस्मादुपस्थितेऽप्यर्थे कस्यचित् प्रतिबन्ध्यते।**
**शब्दस्य शक्तिर्न त्वेषा शास्त्रेऽन्वाख्यायते विधिः।।**

भूमन्दिा इति वार्तिकम् उपस्थाप्य भाष्यकारेण षडर्थन् स्वीकृत्य तेषामेव यथाक्रममुदाहरणानि प्रस्तुतानि किन्तु काशिकाकारः अस्तिविवक्षायामपि, अस्तिमान् इत्युदाहृत्य मतुबादेः सप्तममप्यर्थ प्रकाशं नीतवान्।[2] काशिकामनुधावन् पदमञ्जरीकार आदौ षडर्थभूतं स्वाभिसन्धिं निगद्य सप्तमस्याप्यर्थं विवृणुते।[3] तत्र भूमादिषु अस्तिविवक्षायाञ्च भवन्ति मतुबादय इति समुच्चयो व्याख्येयः। अत्र विवृत्त्यवसरे अस्तिविवक्षायामिति पदेऽस्ति शब्दो विभक्तिप्रतिरूपकनिपात एव प्रतिश्रुतः। अत एव तत्र तस्मादन्य–प्रत्ययविधानोदाहरणमपि प्रदर्शितम्। व्यभिचारादस्ति सामानाधिकरण्यम्, नाऽस्ति इत्यस्तिविवक्षायां प्रत्ययो विधीयते। एवञ्चात्र अस्तिशब्दादस्तिविवक्षायाम् इति तन्त्रेण अर्थो लभ्यते। यदुक्तं पदमञ्जरीकारेण अस्तिमान् इति च वृत्तिविशेषे कर्तृविशेषे धने, अस्तिशब्दो वर्तते। नहि कर्तृसामान्येन प्रत्यार्थस्य विशेषणं सम्भवति। सर्वस्यैव हि सर्वदा यत्किञ्चिदस्ति।

तत्त्वबोधिन्यां तु अस्तिविवक्षायां ये मतुबादयो भवन्ति ते भूमादिविषये भवन्तीति वार्तिकार्थः स्वीकृतः।[4] अतः षडर्थानामेवोदाहरणानि तत्र भाष्यवद् दृश्यन्ते। नागेशेन बालमनोरमाकृता चात्र तत्त्वबोधिनी अनुस्त्रियते। नागेशस्तु एतेनैव बहुब्रीहिरपि यथायथं भूमादिषु बोध्यः, मत्वर्थे बहुस्रीहिः इति वार्तिकादित्याह[5] –

''भूमादिग्रहणमभिधानस्वभावप्रदर्शनार्थम्। बहोर्भावो भूमा। यथा – गोमान्, यवमान्। अत्र मतुप्रत्ययेन भूमादियुक्तस्य एव सत्ता गम्यते। अन्यथा 'नहि कस्यचिद् गौर्नाऽस्ति' अत्रेदं तात्पर्यम् अत्रत्यो भूमाआपेक्षिक एव तेन अस्य यावदुचितं तावदेव बहुत्वबोधकबहुशब्देनापि प्रतीयते। यथा – पञ्चशाभिरपि गोभिर्देवदत्तस्य बह्व्यो गाव इति व्यवहारः, राज्ञस्तु सहस्रगोरपि अलपा एव गाव इति व्यवहारः, राज्ञस्तु सहस्रगोरपि अल्पा एव गाव

[1] मतुप्सूत्रभाष्ये भाष्यकारः।
[2] अत्रैव काशिकाकारः।
[3] अत्रैव तदमंजरीकारः।
[4] तत्त्वबोधिन्याम्।
[5] प्रकृतसूत्रे शेखरे नागेशः।

इति व्यवहारः। अमुमेव भावं विवृण्वन् भाष्यकारोऽपि यावतीभिः खल्वपि गोभिर्वाहदोहप्रसवाः कल्पन्ते तावतीनां सत्ता कथ्यते। कस्यचिच्चतसृभिरपि कल्पन्ते कस्यचिच्छतेनापि न प्रकल्पन्ते।।''

एवमेव यस्य खार्यादिभिः परिच्छिन्ना यवाः सन्ति स यवमान् उच्यते न तु शतेन सहस्रेणापि यवैः। यवमतीभिरद्भिर्यूप प्रोक्षति इति वैदिके विधिवाक्ये संस्कारस्य अदृष्टार्थत्वाज्जातिमात्रसम्बन्धस्य विवक्षितत्वाद् भूमाभावेऽपि मतुप्। भूमादिग्रहणन्तु प्रायेण भूमादयः प्रतीयन्ते इत्येवम्परमेव।

निन्दार्थे ककुदावर्तिनी कन्या, प्रसंसायाम् रुपवान्, नित्ययोगे–क्षीरिणो वृक्षाः, कण्टकिनो वृक्षा, अतिशायने उदरिणी कन्या, संसर्गे दण्डी, इति भाष्यकारेणोदाहृतम्। ककुदावर्तिनी कन्या इत्यत्र निष्फलत्वान्निन्दितत्वं लभ्यते। रूपवानित्यत्र प्रायः सर्वस्यैव चाक्षुष्प्रतयक्ष विषयत्वान्नतादृशं चाक्षुष्प्रत्यक्षविषयो रूपमेव गृह्यते अपि तु प्रशस्तं रूपमिति प्राशस्त्ये मतुप्। एवमेव क्षीरिणो वृक्षा इतयत्र नित्यंः क्षीरयोगो बोध्यते। प्रायः सर्वस्यैव उदरमत उदरिणी इत्यत्र अतिशयितमुदरम् अस्या इति अतिशायने मतुप्। संसर्गपदेन संयोग एव गृह्यते तेन दण्डी इतिपदेन युक्तदण्ड एवोच्यते न तु गृहावस्थितदण्डोऽपि। तेन इह गृहस्थिते विद्यमानेऽपि दण्डे दण्डी इति नाभिधीयते। इह दण्डापुरुषयोः संयोगे सत्यपि दण्डी पुरुष इतिवत् पुरुषी दण्डः पुरुषवान् वा दण्ड इति न प्रयुज्यते। वृत्तिनियामकस्य विलक्षणसम्बन्धस्य अत्राभावात् संयोगे समानेऽपि प्रतीतिबलाद् वैलक्षण्यं कल्प्यते इत्याहुर्मनीषिणः।

भूमातिशययोस्तु इयान् भेदो यद् भूम्नि संख्यया परिच्छेदः, अतिशये तु आकारेण। एवमेव संसर्गनित्ययोगयोः सम्बन्धार्थतया ऐक्येऽपि एकतोऽनित्यः सम्बन्धः संयोगाध्योऽपरतो नित्ययोगः समवायलक्षणः। कामबले, सौराज्ये, कल्याणे–इत्यादीनान्तु प्रशंसायाम् शक्यतेऽन्तर्भावः कर्तुम्। एवमेव उन्नतार्थेऽङ्गविवृदध्यर्थे च विहितप्रत्ययानाम् अतिशायनार्थेऽन्तर्भावः कर्तुं शक्यते। समूहस्य भूम्नि अन्तर्भावो निन्दायां द्वन्द्वोपतापसूत्रान्तर्वर्तिगर्ह्यपदवाच्यस्य कुत्सिते इत्यस्य चान्तर्भावः कर्तुं शक्यते। तथापि भूमादिष्वर्थेषु सत्स्वपि आहतप्रशंसयोः कुत्सिते इत्यनयोः, पृथग्ग्रहणमपि किमपि विशिष्टं ज्ञापयति।

निन्दा अपि व्याकरणे द्विधा विभज्यते प्रवृत्तिनिमित्तनिन्दा, अप्रवृत्तिनिमित्तनिन्दा, प्रथमा 'याप्ये पाशप्'[6] इति सूत्रोक्ता द्वितीया कुत्सित[7] इति सूत्रोक्ता।

प्रवृत्तिनिमित्तमित्यस्यायमर्थः तद्विशेषणं यदाश्रित्य घटादिशब्दाः स्वस्मिन्नर्थे प्रयुज्यन्ते तच्च सामान्यतो जातिव्यक्तिगुणक्रियाभेदैश्चतुर्विधम्। असिमन् अप्रकर्षत्वे भगवता पतञ्जलिना इदमुक्तम् यस्य भावाद्वव्ये शब्दनिवेशस्तद्विधाने, तद्गुणे च वक्तव्ये, प्रयन्तेन भवितव्यम्। यत्र प्रवृत्तिनिमित्तस्य निन्दा न भवति तत्र तादृशं सूत्रं न प्रवर्तते। यथा – कश्चिद् वैयाकरणः शरीरेण कृशः स्यात् तथा तादृशी कृशता तस्य वैयाकरणत्वस्यापकर्षे साधिका नाऽस्ति ति सा वैयाकरणस्य निन्दा न। कदापि जातेः कुत्सा न सम्भवति, घटत्वजातिः न कुत्स्यते।

---

6 पा.सं. 5.3.47

7 पा.सू. 5.3.74

किन्तु यदि धावनकारी अश्वः न द्रुतं धावति चेद् स अश्वः निन्दितः मन्यते। अस्मिन् स्थलेऽपि पदार्थस्य केषाञ्चिद् गुणानां क्रियाया वा अपकर्षं लक्ष्यीकृत्य निन्दार्थकप्रत्यया भवन्ति। अश्वत्वजातेः कुत्सा नाऽस्ति प्रत्युत अश्वधावनस्य पाटवं विवक्षितम्। यच्च अश्वसहचरितस्य कस्यचिद्धर्मस्याश्रयेण भासते। यथाह बालमनोरमाकारः[8] येन धर्मेण कुत्स्यते वस्तु, तद्धर्मयुक्तार्थाभिधायिनः प्रातिपदिकार्थविहिताः प्रत्ययाः स्युः। आलजाटचौ बहुभाषिणी[9] इति सूत्रनिष्पन्नस्य वाचालशब्दस्य निन्दितबहुभाषणकारित्वमर्थस्तत्रववार्तिककारः कुत्सिते इति प्रोच्य तत्पदं कुत्सितार्थे नियमयति। यद्यपि सूत्रकारेण कण्ठतो न किमप्युक्तं तथापि वार्तिकप्रदर्शितार्थः पाणिनिसम्मत एवं प्रतीयते। एषा निन्दा प्राणिस्वभावगता, किन्तु ककुदावर्तिनी कन्या, अत्रत्या निन्दा तद्धर्मभूतगुणनिबन्धना।

मत्वर्थप्रकरणे 'रूपादाहतप्रशंसयोर्यप्'[10] इति सूत्रे सूत्रकारेण प्रशंसापदमुपात्तम्, तत्र प्रशंसाया अर्थे यत्प्रातिपदिकं विद्यमानं तस्मात् स प्रत्यय इति भावः। प्रशंसायाः स्वरूपं प्रकृतेरर्थस्य विस्पष्टता। तथा हि स्वव्यापारे कस्यचित्पटुत्वस्य प्रकर्षो दृश्यते तदा प्रशंसा इति प्रोच्यते। अतश्चौरस्यापि तदेव प्राशंस्त्यं यदा स अक्ष्णेरञ्जनं रहते्। प्रशंसास्वरूपज्ञानार्थं 'रूपाहतप्रशंसयोर्यप्' इति सूत्रं समालोच्यम्, तत्र रूप्यपदं निष्पद्यते प्रशस्त्यरूपसम्पन्नेऽर्थे, यदा च प्रशंसाभावो न भवति तदा रूपवान् इति पदम्। प्रकरणादपि क्वचित्प्रशंसा गम्यते। यथा–कृत्यैरधिकार्थवचने[11] इत्यत्र एकेनैव समस्तपदेन स्तुतिफलकं निन्दाफलकञ्च तात्पर्यं लभ्यते। तद्यथा काकपेया नदी, वातच्छेद्यं तृणम्। पूर्वोक्तोहाहरणेनेदं सुस्पष्टं यद् यथाविवक्षा भवति तथैव निन्दाप्रशंसयोरर्थो गम्यते। इदं सर्वं विवक्षामहिमा। अत एव कैयटः यश्च प्रशंसावाची तस्य निन्दावचनत्वमपि दृश्यते। यथा कश्चित्पुरुषो राक्षसः, प्रेतः, व्याघ्रो वा कथ्यते तदा यदि पुरुषातिशयो विवक्ष्यते तदा प्रशंसा, यदा च नैर्घृण्यं विवक्ष्यते तदा निन्दा। यथा च कालिदासीया पदधोरणी ''तैनैव शोकापनुदेन पुत्री,[12] स्वागतं पुत्रवत्यै इत्यादिषु प्राशस्त्ये ततः पुत्रवतीमेनां प्रतिपत्स्ये[13] त्वदाज्ञया इत्यत्र संसर्गार्थतया पुत्रसहिताम् इति, महीभृतः पुत्रवतोऽपि[14] दृष्टिरिति कुमारपद्ये भूमार्थतया बहुपत्यस्यापीत्यर्थः। अत्रैकस्यैव मतुबन्तस्य भूमप्रशंसासंसर्गार्थेषु प्रसङ्गभेदाद्द्विवक्षाभेदाच्च प्रयोगोमहाकविना वहितः। किनतु रूपवानित्यस्य निन्दायाम्। वाचालइ त्यस्य प्रशंसायां प्रयोगस्त्वनभिधानान्नैव भवति। अतिशायने प्रशंसायाञ्च परस्परम् इयान् भेदो यदेकत्र अन्यापेक्षत्वम् नितरामपेक्षते प्रशंसायाश्च निरपेक्षत्वमेव। तद्यथाअतिशायने तमबिष्ठनौ''[15] इत्यत्र अतिशायने तमप्, 'प्रशंसायां रूपप्' इत्यत्र अर्थविस्पष्टतारूप–प्रकर्षातिशयवाचकप्रशंसार्थे रूपप् इति कश्चोभयोर्विशेष इति विज्ञासायाम् इत्थं समाधातुं

[8] सिद्धान्तकौमुदी–टीकाकारः।
[9] पा.सू. 5.2.125
[10] पा.सू. 5.2.120
[11] पा.सू. 2.1.33
[12] तेनासलोकः पितृवान्विनेत्रा तेनैव शोकापनुदेन पुत्री रघु. 14–23
[13] ततः पुत्रवतीमेनां प्रतिपत्स्ये त्वदाज्ञया–रघु. 15.73
[14] महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्निपत्येन जगाम तृप्तिम् कुमार 1.27
[15] पा.सू. 5.3.55

शक्यते। तमप्प्रत्ययो यस्मिन्नतिशायनार्थे भवति स समानप्रतियोग्यपेक्षया भवति। यथा सुन्दरतमः केषु? किनतु प्राशस्त्यम् कस्याप्यपेक्षयैव भवेदिति नाऽस्ति नियमः। तुलनाविवक्षा तत्र न भवति प्रत्युत स्वयं तस्मिन्नुत्कर्ष आधीयत इति प्रतियोगिनिरपेक्षित्वं तस्य। भूमादयोऽर्थाः प्रकृत्यर्थाः, प्रत्ययार्थाः, समुदितार्था वेति विचार इत्थं वक्तुं शक्यते रूपादाहतप्रशंयोर्यप् इति सूत्रे प्रशंसाविशिष्टेऽर्थे वर्तमानाद् रूपशब्दान्मत्वर्थे यबिति वृत्त्या प्रशंसायाः प्रकृत्यर्थत्वं गम्यते, किन्तु रूपवान् इत्यत्र तु प्रत्ययार्थ एव सा। अमुं भेदमेवोन्नेतुं भूमादिष्वर्थेषु सत्स्वपि आहतप्रशंसयोरिति कण्ठतः प्रशंसापदोपादानं कृतं सूत्रकारेण पृथक्। वाग्मी, वाचाल इत्यत्र प्रशंसाकुत्सयोर्वाचकत्वेन प्रतयय एवाङ्गीकरणीयः स्यात्। किन्तु राजन्वान् इत्यत्र सौराज्यर्थास्य प्रतीतये प्रकृतिप्रत्ययार्थयोरुभयोरेव योगो वाचकतया स्वीकर्तव्यः। अतएव नलोपाभावमूलकेन निपातनेन तदनुशिष्यते।[16] नागेशस्तु[17] अत्र किञ्चिद्विशिष्टमभिदधानो विराजते। एवञ्च प्रकृत्यर्थतावच्छेदकस्य तत्सहचरितगुणानां वा पूर्वत्वमेव प्रशंसा, तस्य परिपूर्णत्वेन क्वचिन्नन्दाप्रतीतिस्तु प्रकरणादिवशाद्रम्या इति न दोषः। भूमातिशायनयोरप्येकस्य संख्याधिक्यमपठितस्य स्वरूपातिरेकेण वैपुल्यमित्थं शक्यते भेदो विवरीतुम्–प्रकृत्या शब्दो द्विविधिः कश्चिदुद्भूतावयवभेदकसमुदायबोधकः यथा वृक्षशब्दः। अतो वृक्षा इति बहुवचनान्त एव तत्र प्रयुज्यते। कश्चच्च शब्दस्तिरोहितावयवभेदक–समुदायबोधकः। यथा–वनशब्दः। तत्रैकवचनान्तवनशब्द एव प्रयुज्यते वनमिति। तत्र संस्थात्वेन परिच्छेतुं योग्यस्य वस्तुनः प्राचुर्यं भूमपदेन द्रव्यैक्य आकृत्या स्वरूपतो वा परिच्छेतुमर्हस्य पदार्थस्य वैपुल्यमतिशयपदेन बोध्यते। अत एव उदन्वान् अर्णव इत्यादावतिशायन एव मत्वर्थप्रत्ययः। किन्तु प्रचुराः शिलाः सन्तीति ज्योत्सत्रादित्वादपि भूमार्थे शैल इति। एवमेव पर्वाणि यत्र सन्तीति पर्वत इत्यत्र च। अतिशयितौ दन्तौ अस्येति दन्ती इति जातिविशेषार्थप्रतीतिः। न सा मतुबन्तेन प्रकाशयितुं शक्या। भगवतो हेरम्बस्य उदरित्वं प्रशंसायै न तु कन्यायाः। इत्थं भवति गुणगुणिनोः समवायसम्बन्धत्वे नित्ययोगः तथाप्यत्र न नित्ययोगः। नित्ययोग एव बोध्यते अपि तु प्रशंसापि तद्रता, अत एवं केवलं गृहयोगेन न कश्चिद् गृही भवति अपि तु प्रत्यासत्त्या अपत्यकलत्रादिषु दुर्भेद्या शक्तिः ग्रन्थिसत्त्वमपि तेन प्रतीयते आकण्ठप्रपञ्चनिमग्नत्वञ्च। यथा विरक्तस्य विषये गृहीति निन्दां बोधयति न तथा सर्वसाधारणस्य। यथा सभायां असंस्कारमूलं जटिलत्वं निन्दाप्रयोजकम् न तथा अरण्यनिवासिनां महात्मनां विरक्तानां देहाध्यासरहितानाम्। न केवलम् अतिशयितेन आयुषा कश्चिदायुष्मान् भवति तत्र परोपकारादिगुणोज्ज्वलजीवनेनाऽपि सर्वजनस्पृहणीयतया तस्य प्राशस्त्येन तथात्वं गम्यते। एवमेव न कश्चिद्धनुर्योगादेव धन्वी प्रोच्यते अपितु धन्विपदेन धनुश्चालने प्राशस्त्यं नैपुण्यञ्च तेन लक्ष्यते। एकया पताकया कस्यचिद् राज्ञः सेना पताकिनी न भवति इत्थं विचारे भूमाद्यर्थसमीक्षणपर इदं लब्धं भवति यद् बहवो मतुबन्ताः बज्री पिनाकी लाङ्गलीत्यादयो विशिष्टार्थमेव बोधयन्तो भवन्ति। मेदिनीति पदं पृथिव्या मेदजनितत्वरूपं पौराणिकमाख्यानं सूचयति। एवभूतानि पदानि–इतिहासायन्ते। लक्ष्मण–शशी–सरस्वती–हनुमान्–इत्यादीनि

[16] राजन्वान्सौराज्ये पा.सू. 8.2.14

[17] महाभाष्योद्योतटीकाकारः।

कानिचित्पदानि रूढ्या अर्थविशेषमेवाभिदधति यौगिकार्थमन्वयं विनापि। प्रायः सर्वस्यैव हनुरस्तीति, इन्द्रवज्रहतहनोस्तथा हनुमत्संज्ञायां किमभिप्रेतमिति कस्मिन्नर्थेमतुप् इत्यादिकं समालोचयिष्यते यथाप्रसङ्ग तुरीयाध्याये। अत्र भूमाद्यर्थे भाष्यकारानुरोधेन विहितानां टीकाकृद्विचाराणामभिमतं प्रस्तूयते तदस्यास्तयस्मिन्निति सूत्र–इति करणात् प्रत्ययस्य भावमित्थं श्लोकवार्तिकमुखेन अनुगृह्णति वार्तिककारो भूमनिन्देति–अत्र भाष्यकारेण षडर्थन् स्वीकृत्य तेषामेवोदाहरणानि प्रस्तुतानि। किन्तु काशिकाकारः अस्तिविवक्षायाम् अस्तिमान् इत्यादाहृत्य मतुबादेः सप्तममप्यर्थमभिधत्ते। पदमञ्जरीकार आदौ स्वाभिसन्धिं षडर्थभूतं निर्गद्य काशिकानुगुणं सप्तममप्यर्थं विवृणुते। तत्र भूमादिषु अस्तिविवक्षाया अन्तर्भावान्मतुबाध्दय इति काशिकाकारः। विवृत्यवसरेऽस्ति–विवक्षायामिति पदेऽस्तिशब्दो विभक्तिप्रतिरूपकनिपातरूप एव स्वीकृतः, अत एव तत्र तस्मात् अन्यप्रत्ययविधानोदाहरणमपि प्रस्तुतम् अस्तिमान्। अस्तिशब्दादस्तिविवक्षायामिति तन्त्रेण लभ्यते तदुक्तं पदमञ्जरीकारेण अस्तिमान् इति च वृत्तिविषये कर्तृविषये धनेऽस्तिशब्दो वर्तते। नहि कर्तृसामान्येन प्रत्ययार्थस्य विशेषणं सम्भवति सर्वस्येह सर्वदा यत्किञ्चिदस्ति। तत्त्वबोधिन्यान्तु अस्तिविवक्षायां ये मतुबादयो ाीवन्ति ते भूमादिष्वर्थेषु भवन्तीति वार्तिकार्थः स्वीकृतः। अतः षडर्थानामुदाहरणं तत्र भाष्यवद् दृश्यते। नागेशस्तु बहुव्रीहिरपि भूमादिषु यथायथं बोध्यः, मत्वर्थे बहुव्रीहिरिति वार्तिकादित्याह। भाष्ये तु प्रशंसायां रूपवान् इत्युक्त्वा नहि कस्यचिद् रूपं नास्ति, अतः पशंस्तं रूपमस्येति मतुप्। नित्ययोगे क्षीरिणो वृक्षाः, कंटकिनो वृक्षाः, नित्यं क्षीरसम्बन्धस्तेषां ते। अत्र नित्ययुक्तस्यैव सत्ता कथ्यते। एवम् अतिशायने उदरिणी कन्या, संसर्गे दण्डी, छत्री, इत्युदाहृतम्। इत्थं संकलनेन भूमाद्यर्था अत्र विवेचिताः।